# श्रीमद् - हनुमद्रुद्रसूक्तम्

## अर्थात्

## ( हनुमत् सहस्त्रनाम स्तोत्रम् )

12184
RS 6.32
180. Jd.
97·6



किंमत ७० पैसे

संग्राहक :- डॉ. ना. श्री. वाटवे, कल्याण

भारत सरकार
GOVERNMENT OF INDIA
राष्ट्रीय पुस्तकालय, कलकत्ता ।
NATIONAL LIBRARY, CALCUTTA.

वर्ग संख्या
Class No. 180. Jd. 97·6

पुस्तक संख्या
Book No.

रा० पु०/ N. L. 38.

MGIPC—S19—69/1842/14 LNL (PB)—25-5-70—150,000.

डा. ना. श्री. वाटवे
वाटवे हाऊस, ब्राह्मण, सोसायटी मुरबाड रोड
कल्याण ( जि. ठाणे )

SHELF LISTED.

NATIONAL LIBRARY
No. 5784
Date. 20.7.71
CALCUTTA.

मुद्रक :
व. ग. देवकुळे, व्यवस्थापक
चित्रशाळा प्रेस, पुणे ३०

180. Jd. 97.6

# प्रतिज्ञाषटकम्।

ममायं भारतो देशो भारतीयाश्च बान्धवाः।
आद्रिये भारतं देशं मदीयं हि सनातनम् ॥ १ ॥

परंपरां भारतीयां वैविध्येन विभूषिताम्।
समृद्धां चाभिमन्येऽहं सुजनैः सुप्रतिष्ठिताम् ॥ २ ॥

परंपरां रक्षितुं तां पादातिः स्यामहं क्षमः।
सदैव तत्र निरतः यतेय श्रद्धया दृढम् ॥ ३ ॥

संमानयेऽहं पितरौ गुरूनाप्तांश्च सर्वदा।
सौजन्येन तथा वर्ते सर्वैः सम्बन्धिभिः सह ॥ ४ ॥

मदीये भारते देशे तथा भारतवासिषु।
सत्येन प्रतिजानामि निष्ठां मे सार्वकालिकीम् ॥ ५ ॥

यत्कल्याणं समृद्धिश्च या हि भारतवासिनाम्।
तदेव मम सौख्याय नान्या मे कामना हृदि ॥ ६ ॥

॥ श्रीराम: समर्थ: ॥

# श्रीमद् हनुमद्रुद्रसूक्तम् । अर्थात्

## ( हनुमानसहस्रनाम )

### श्री गणेशाय नमः ।

### अथ ध्यानम्

वीरश्रीमच्छरीरी धृतमुकुटशिरा आयसीं गुरुगदां च ।
हस्ते धृत्वा मनस्वी रिपुशिरदलने बद्धनिष्ठो दृढांगः ॥
पश्चात्स्वपुच्छशस्त्रमुपरिस्वाशिरो धारयन् बद्धमुष्टिः ।
पायाच्छ्रीवीरवर्य शतशतशतशोऽप्यग्रणीर्मारुतिर्माम् ॥

### इति ध्यानम्

अस्य श्रीमद्धनुमद्रुद्रसूक्तस्य श्री नारायणऋषिः । वैदिकच्छंदः । श्री हनुमान् देवता । तस्य च श्रीमद् भगवद्रामचंद्रप्रतिनिधित्वं शक्तिः । दैवतत्वं बीजम् । तथाच श्रीमति भगवति रामचंद्रे हनुमतो दृढा भक्तिः कीलकम् । जपे तपे नमस्करणे मार्जने अभिषेके पुष्पार्पणे हवनकर्मणि वा विनियोगः । श्रीमद्धनुमत् कृपा संपादनं फलम् ।

# अथ प्रथमोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]रुद्रायदशैकाय [२]चिरंजीवाय [३]अतिबलाय
[४]अपूर्वबलाय [५]अत्युच्छ्रितबलाय [६]अद्भुताय [७]अद्भुतवीर्याय [८]
[८]अद्भुतपराक्रमाय [९]अपरिमेयाय [१०]अत्युछ्रितकीर्तये च ते
नमः ॥ १ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]अनेकदाय [२]अकृतघ्नाय [३]अवंचकाय [४]अनागत
विधात्रे [५]अयज्ञविष्याय [६]अन्यपूजकाय [७]अमत्सरिणे
[८]अतिभीषणाय [९]अतिशक्तिमते च ते नमः ॥ २ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]अग्रेसराय [२]अतिभारवाहनाय [३]अशोकवनरक्षक
घातकराय [४]अक्रूराय [५]अंगदरुपिणे [६]आग्राह्याय [७]अघनाशनाय
[८]अबलाय [९]अचिंत्यविक्रमाय च ते नमः ॥ ३ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो अच्युताय अजितात्मने अणुरूपधराय
अतीन्द्रियाय अतुल्यगुणाय अदृश्याय सकलाधाराय
अधृताय अनघरूपिणे च ते नमः ॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो अनन्तरूपाय अनन्तशक्तिने रामकीर्तिवर्धकाय
अनिरुद्धाय अनिर्विण्णाय अनिर्देश्यवपुषे
अनिवर्तिने अनुकूलाय अनुत्तमाय च ते नमः॥ ५ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो अनीशाय अर्जुनगर्वहारिणे अमृततुल्याय
अप्रतियोध्द्रे अप्रमत्ताय अमानिने अमितविक्रमाय
अमृताय अमृतवपुषे च ते नमः ॥ ६ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो अमृतांशाय अमृत्यवे अमोघवीर्यपराक्रमाय
अमोघाय अमोघशक्तये अरौद्राय अहार्याय
अत्यन्तविज्ञात्रे अव्यंगाय च ते नमः ॥ ७ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]अव्ययाय [२]अशोकाय [३]असक्तकर्मिणे [४]अक्षराय
[५]अक्षोभ्याय [६]अधर्मकृत्क्षोभ्याय [७]अभक्तेषूग्राय
[८]अल्पसंतुष्टाय [९]अनेकविक्रमाय च ते नमः ॥ ८ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]अतुल्यदोर्दंडाय [२]अशोकवनिकापावनाय
[३]अरिदुःसहाय [४]अभक्तदुर्लभाय [५]अमितभक्तप्रसादकर्त्रे
[६]अत्युत्तमभक्ताय [७]अपरिग्रहाय [८]अल्पवपुषे [९]अदृश्यमूर्तये-
च-ते-नमः ॥ ९ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]अरिदुष्कृत्यविकर्त्रे [२]दुष्टानामकार्यनाशकराय
[३]अतिविक्रमिणे [४]अरिविदारणाय [५]अधर्मिविश्वभक्षिणे
[६]अरिविषमाय [७]अनेकमूर्तये [८]अनेकभक्तानंदाय
[९]अतिवीरशब्दयोग्याय च ते नमः ॥१०॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]अनिलजाय [२]अशोकवनिकानिपातकराय

ॐ अक्षहन्त्रे ॐ अरिष्टनगभूमिसात्करणप्रभवे ॐ अनिलसूनवे
ॐ अकंपनहन्त्रे ॐ अतीवधृतिमते ॐ अतीवयशस्विने
ॐ अतीवदाक्ष्यविदे ॐ अतिवोत्तमसामर्थ्यवते च ते नमः ॥११॥
इति श्रीमद्धनुमद्रुद्रसूक्तस्य रामकीर्तिवर्धकनामकः
प्रथमोऽनुवाकः ।

## अथ द्वितीयोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो ॐ अतीवबुद्धिमते ॐ अतीवविक्रमवते ॐ अतीवपौरुषवते
ॐ अतीवविनयान्विते ॐ अतीवनयनिपुणतावते ॐ अतीवप्राज्ञाय
ॐ अनेकगुणालयाय ॐ अतिजिष्णुविष्णुश्रीदयमप्रभावाय
ॐ युधिष्ठमराधिकाय ॐ अनामयाय च ते नमः ॥ १ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो अजेयाय अतुलकीर्तिमते अतिसर्वगुणोपेताय
अर्जुनध्वजस्थाय अनघाय अदीनाय:अधर्षणाय
अजिताय अतिबालिने च ते नमः ॥ २ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो अतुल्याय रामभक्ताय अमित्रजिते अमोघ-
दर्शनाय
अनेकगुणसंपनेय अतर्क्यबलाय अनंतविक्रमाय
अगाधबुद्धये अपरिमिताय च ते नमः ॥ ३ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो अपराजिताय अप्राकृताय अतिबलबाहुयोध्दे
अनाहूतोऽपिकृपाकर्त्रे अंजनासूनवे अंजनासुताय
अंजनाऽऽनंदाय अंजनानंदवर्धनाय अंबुजपत्राक्षायच–ते
नमः ॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्य ।
ॐ नमो अंबुजयोनि प्राप्तप्रसादाय अंजनोत्पादितरूपाय

[३]आंजनेयाय [४]आनंदाय [५]आर्यव्यवहारकोविदाय
[६]आश्रिताभिमानिने [७]रामजयविजयाय [८]आधिव्याधिहराय
आयुरारोग्यप्रदाय च ते नमः ॥ ५ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]आरोग्यसुखदाय [२]ईष्टाय [३]ईष्टस्त्राथिवानवते
[४]ईहामुत्रसुफलदाय [५]ईज्याय [६]ईशानाय [७]ईश्वराय
[८]ईश्वरप्रतिनिधये [१]उत्प्लवनकर्माग्रेसराय च ते नमः ॥ ६ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]उपललक्षभारसहन क्षमपुच्छाय [२]उपललक्षषड्-
भारसहनक्षमाशिरसे [३]उद्योगप्रियाय [४]उदाराधिये [५]उदीर्णाय
[६]उग्रतेजसे [७]उत्कृष्टप्रतापाय [८]उत्तरार्णवादभिषेकवारिआहर्त्रे
उदाराय च ते नमः ॥ ७ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]ऊर्जिताय [२]ऊर्जितशासनाय [३]ऊर्ध्वगाय [४]ऋद्धाय
ऋषिसंन्निधिवास्तव्याय [६]ऋषिवल्कलदारकाय [७]ऋषिदत्त-
शापरूपवराय ऐन्द्रवज्राऽवध्याय [१]एकस्यैतस्य भुजयोर्म-

यावीर्येण जानकीप्राप्ताकीर्तिरियं श्रीश्चसौमित्रिश्च रणे जयश्चैव" मेवं श्रीमद्रामप्रभु स्तुतमहिम्ने च ते नमः ॥८॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो ऐश्वर्यवन्ताय ओजस्तेजोद्युतिधराय विघ्न-रोगाणामौषधाय कमलेक्षणाय कृतघ्नशत्रवे कार्यवाहिने कर्तृत्वतामग्रेसराय कथिताय कनकाङ्गादिने च ते नमः ॥ ९ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो कपिदेवाय कपिलाय कपीन्द्राय कान्ताय कपये कृतकर्मणे कृतलक्षणाय कृतज्ञाय कृतिनां वराय च ते नमः ॥१०॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो कार्यायतापसत्वेषधारिणे कपिनायकाय कपि-केसरिणे कपिपुंगवाय कपिपण्डिताय कोपनाय काय-

मच्छादनक्षमाय कलावते करूणालयाय क्रियावृत्तये
च ते नमः ॥११॥
इतिश्रीमद्धनुमद्रुद्रसूक्तस्य रामभक्तनामका द्वितीयोऽनुवाकः ।

## अथ तृतीयोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः कार्यसाधकाय लंकागतफलपात योजकाय कामरूपिणे कामचारिणे कालाग्निशमनाय कीशोत्तमाय कीशकुंजराय कीशप्रमुखाय खगमनकर्मनिपुणाय खंडित द्रोणाचलाय च ते नमः ॥ १ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो गगनगाय गीर्वाणीवाक्प्रवीणाय गुरुजनपूजकाय गुर्वभीभानिने गंभीरस्वभावाय गंभीरमुद्राम गतिसत्तमाय गदाधराय गंभीरदर्शनाय च ते नमः ॥ २ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]गुणभृते [२]गुप्तरूपाय [३]गुरवे [४]गुरुत्मांस्तुल्यप्रभावाय [५]गदाहस्ताय [६]गणाकराय [७]गंभीराय [८]गायकाय [९]गुरुरूप-धराय च ते नमः ॥ ३ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]घोराय [२]घोरतराय [३]घोरतमाय [४]घोररूपिणे [५]चतुराय [६]चतुरात्मने [७]चेतनाय [८]चलाय [९]चैत्यपालनाशनाय च ते नमः ॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]चण्डविक्रमाय [२]छिन्नसंशयाय [३]रामेश्वरैक्य साक्षिणे [४]जयदाय [५]जयवर्धनाय [६]जगत्प्रसिद्धाय [७]जगत्प्राणतनयाय [८]जांबवत्स्तुताय [९]जितलंकादुर्गाय च ते नमः ॥ ५ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]जीवनाय [२]जानकीजीवनप्रियकृते [३]जितामित्राय [४]जितकामाय [५]जरामरणमोक्षसाधकाय [६]जंबू मालिहननाय

झँटितिकार्य साधकाय टंकितसागराय वाँनरठक्कूराय
च ते नमः ॥ ६ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो डमरुधरांशाय अढालिने दशैकणांशाय
ताराय तुष्टिदाय तेजोद्दृषाय ताँपत्रयनिवारकाय
त्रिशिराघातकराय भक्तथोडनाय च ते नमः ॥ ७ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो दैत्ताभिघातराहवे देवैराड्वज्रसाहिने दुराधर्षाय
दोर्दंडपांडिताय दुष्टतर्जनाय दुष्टदमनाय दुष्टदर्पशामकाय
दक्षाय दुर्गमाय च ते नमः ॥ ८ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो दुष्टानांदारूणदर्शनाय दुष्टजेत्रे दुर्जयाय दुर्धराय
दुर्मनोरथबाधाकराय दुर्मर्षणाय दुरतिक्रमाय जितेंद्रियाय
दुरावासाय च ते नमः ॥ ९ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो दुष्कृतिहन्त्रे दुष्टसंहारकर्त्रे दुःस्वप्नफलनाशनाय

[४]दृढवपुषे [५]द्युतिधराय [६]द्रविणप्रदाय दुष्[७]टनिग्रहकारिणे [८]दुष्टनियन्त्रे [९]देवैश्वर्यसंपन्नाय च ते नमः ॥१०॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]दुष्टभयकृते [२]द्विषत्पावकाय [३]दुष्टदहनाय [४]दिव्य विजयाय [५]दृढमुष्टिबलवते [६]दुष्टशास्त्रे [७]देवान्तकहन्त्रे [८]दुष्ट-संप्रमर्दनाय [९]दुष्टक्षोभणाय [१०]दुष्टनिग्रहकर्त्रे च ते नमः ॥११॥

इतिश्रीमद्धनुमद्रुद्रसूक्तस्य रामेश्वरैक्यसाक्षी
नामकस्तृतीयोऽनुवाकः ।

## अथ चतुर्थोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]दुष्टत्रासनाय [२]दुष्टमदापहर्त्रे [३]दुष्टदर्पविनाशाय [४]दयावते [५]दीनपते [६]दक्षाय [७]द्युतिवर्धनाय [८]देवरूपाय [९]धर्म-वर्धनाय [१०]धन्याय च ते नमः ॥ १ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]धन्यजीवनाय [२]धन्यजीवनमार्गदर्शकाय [३]धर्म-
रक्षणकराय [४]धर्मग्लानिहराय [५]धर्माधाराय [६]धीराय [७]धीरो-
त्तमाय [८]ध्रुवप्रतापाय [९]धृतात्मने च ते नमः ॥ २ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]धूम्राक्षहन्त्रे [२]निराकुलाय [३]निश्चलाय [४]निरु-
पाधिकाय [५]नित्यतृप्ताय [६]नित्याय [७]नियताय [८]निगृहीते-
न्द्रियाय [९]निवृत्तात्मने च ते नमः ॥ ३ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]नैकाय [२]निरभिमानिने [३]न्यायदयालवे
[४]नानारूपधराय [५]नैकरूपाय [६]नैककर्मकृते
[७]निकुंभहन्त्रे [८]नियोगादधिकंसाधयित्रे
[९] "नात्मबलं वेत्तासि स्वयमित्यलं" कीर्तिस्तवान्येन
यदा भवित्रीस्मारिता पुनः । तदाऽऽजननेय न चिराद्बल-
वृद्धिर्भविष्यती" ति प्राप्तब्राह्मण शापरूपवराय च ते
नमः ॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]प्रवृद्धाय [२]प्रचंडाय [३]रामनामधारकाय [४]पराक्रम-मूर्तये [५]पौर्णिमादिनपावनकर्त्रे [६]प्रातःकालजन्मवते [७]प्राप्त-सर्वास्त्रधातशक्तये [८]परहितकारिणे [९]पराधिकारचर्चापराङ्-मुखाय च ते नमः ॥ ५ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]प्रत्युत्पन्नमतये [२]पुच्छध्वजाय [३]पुच्छशस्त्राय [४]पवनात्मजाय [५]परमन्यायिने [६]पवनतुल्यगतिमते [७]पवित्राय [८]पापनाशनाय [९]पुण्यकीर्तिमते च ते नमः ॥ ६ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]पुण्यश्लोकाय [२]पुण्यदर्शनाय [३]पुरंदराय
[४]पुरातनाय [५]पुरुषोत्तमाय [६]पुष्टाय [७]पूतात्मने
[८]पूर्णाय [९]पृथवे च ते नमः ॥ ७ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]पेशलाय [२]प्रकाशनाय [३]प्रतर्दनाय [४]प्रतापनाय

[५]प्रतिष्ठिताय [६]प्रथिताय [७]प्रभूतविक्रमाय [८]प्रामाणिकाय
[९]प्रमोदनाय च ते नमः ॥ ८ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]प्रसन्नात्मने [२]प्राणस्वरूपिणे [३]प्राणनिलयाय
[४]प्राणभृते [५]प्रांशवे [६]पंडिताय [७]प्लवंगमेश्वरप्रियाय
[८]प्रभंजनसुताय [९]प्लवंगप्रमुखाय च ते नमः ॥ ९ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]प्लवंगेन्द्राय [२]प्रभंजनाय [३]पवनस्यौरसःसुताय
[४]प्लवंगमशार्दुलाय [५]प्लवंगर्षभाय [६]प्राज्ञसत्कृताय
[७]प्राप्तिवरसामर्थ्याय [८]पवनसुताय [९]पराक्रमिणे
च ते नमः ॥ १० ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]परमोदाराय [२]परमानंदसागराय [३]पुष्टिदाय
[४]प्रज्ञावते [५]परमार्थप्रबोधकर्त्रे [६]प्रतिमाश्रयाय

[७]कालस्यफलाय [८]बुद्धिमतांवराय [९]बहुश्रुताय
[१०]बहुप्रदाय च ते नमः ॥ ११ ॥

इति श्रीमद्धनुमद्रुद्रसूक्तस्य
रामनामधारको नाम चतुर्थोऽनुवाकः ।

## अथ पंचमोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]बहुप्रसादाय [२]बिभीषणसखिने [३]बलवतामग्रेसराय [४]बलवीराय [५]बाहुवीराय [६]बाहुयुद्धविशारदांप्रभवे [७]बाह्वायुधाय [८]बलदत्तप्रहाराद्रावणमोहकर्त्रे [९]बुद्धिमते [१०]ब्रह्मण्ये च ते नमः ॥ १ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]बुद्धिविनियोगयुक्कार्यसाधकाय [२]ब्रह्मचारि-

व्रतेस्थिताय ब्रह्मचर्यतेजोदीप्तिमूर्तये बृहत्शरीरभृते बाल
ग्रहविनाशकराय त्रैकालिकमहत्त्ववते श्रीमद्रामप्रभुप्रति-
निधये पृथ्वीपतित्वपदे अव्याकृताय च ते नमः ॥ २ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।

ॐ नमो भक्तकार्यसिद्धि हेतवे श्रीमद्रामप्रभु प्रापि-
तदेवत्ववते भक्तभयमुक्तिहेतवे सुनियतेन्द्रियाय अवि-
चिन्त्यब्रह्मचर्यमहाव्रते स्थिताय भक्तभवभावनाय
भक्तानांपरमार्तिहन्त्रे विर्दिताखिलशास्त्रसाराय सत्य-
संधायच ते नमः ॥ ३ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो दुर्गमभवसागरनौः स्वरूपाय अत्यद्भुताय
दुष्टेभ्यःकुपिन्तान्तकदर्शनाय सदाअभयदाय लोकत्रये
ऽपिसुफलदाय जन्तोरशेषभीतिहर्त्रे अतिशुभमतिप्रदाय
दारिद्र्यदुःखभयहरणाय सर्वोपकारकरणाय च ते
नमः ॥४॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]दुर्वृत्तवृत्तशमनाय [२]भक्तस्यशत्रुभयहर्त्रे [३]अवि-
चिन्त्याय [४]अन्यैरतुल्याय [५]समरनिष्ठुराय [६]सदाशिवाय
[७]दुर्गपाराय [८]अतिसौम्याऽतिरौद्राय [९]अव्याहताऽऽज्ञाय च
ते नमः ॥ ५ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]निर्जिवताऽखिलशत्रवे [२]दुर्वृत्तानामशेषबलहानि-
कराय [३]रक्षोभूतपिशाचानांनाशकर्त्रे [४]दावाग्निपरिवारित-
मुक्तिकर्त्रे [५]शून्येदस्युभिरावृतस्य मोचकाय [६]शत्रुगृहीतस्य-
मोचनकर्त्रे [७]सिंहव्याघ्राऽनुयातानांभयहर्त्रे [८]राजभय-
निवारणकर्त्रे [९]बंध विमोचनकराय च ते नमः ॥ ६ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]वाताऽघूर्णितस्यमुक्तिकर्त्रे [२]महार्णवेपोतस्थितस्य
संकटपरीतस्य मुक्तिकर्त्रे [३]पतत्सुशस्त्रेषुरक्षणकर्त्रे [४]सर्वघोर-
बाधानिवारकाय [५]वेदनाऽभ्यर्दितस्य मुक्तिकर्त्रे [६]प्रणतां-

National Library, Calcutta

वृद्धिकर्त्रे सर्वसुखदात्रे श्रीमत्सौभाग्यजननकर्त्रे सर्वकाम फलावाप्तिसाधनैकसुखावहाय च ते नमः ॥ ७ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]समस्तसौभाग्यसंपत्सुखदात्रे [२]विज्ञानसंपत्सुखदात्रे [३]दीनार्तिविच्छेदनहेतुभूताय [४]प्रणतहृदयशोकहारकाय [५]शरणागतरक्षकाय [६]सर्वकमनीयगुणाश्रयाय [७]दुरितक्षय कारकाय [८]धनधान्य समृद्धिदाय [९]भवसागरतारकाय च ते नमः ॥ ८ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]अमितदुर्गतिभंजकाय [२]वरसद्गतिदायकाय [३]सर्वमंगलसंपूर्णाय [४]भुवनार्तिनाशकाय [५]भक्तानामभयप्रदाय-[६]सर्वैश्वर्यसमन्वितायाय [७]सर्वैश्वर्यप्रदाय [८]सर्वैश्वर्यमंगलोत्पत्तिकराय [९]भक्तवत्सलाय च ते नमः ॥ ९ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तरक्षणाय [२]भक्तस्तुतिग्राहकाय [३]भक्तसौम्याय

180.9.7.76
5784 dt 20.7.76

भक्तेष्टकारिणे भक्तोत्तारणाय भक्तगोप्त्रे भक्तगोविंदाय भक्तजनेश्वराय भक्ततारणाय च ते नमः ॥१०॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।

ॐ नमो भक्तदक्षिणाय प्राणदात्रे भक्तचिंताहराय प्रभंजनाय भक्तसुलभाय भक्तधर्मविदुत्तमाय भक्तधर्मिणे भगवन्निष्ठाप्रभवे भक्तसारथिने भक्तपावनाय च ते नमः ॥११॥

इति श्रीमद्धनुमद्रुद्रसूक्तस्य श्री मद्राम प्रभुप्रति निधि नामकः पंचमोऽनुवाकः ।

## अथ षष्ठोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।

ॐ नमो भक्तहितेरतस्वामिने भक्तरक्षणव्रताय भक्ति-भोग्याय भक्तिभाग्याय च भक्तभयनाशनाय भक्तभयाऽ

पहाय [६]भक्तवंदिताय [७]भक्तभावनाय [८]भक्तभारभृते [९]भानु-
ग्रासप्रयत्नाय [१०]भीमायच ते नमः ॥१०॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भीमपराक्रमाय [२]भक्तात्मने [३]भूरिदक्षिणाय
[४]भक्तभूषणाय [५]भक्तिभोक्त्रे [६]भ्राजिष्णवे [७]भक्तमंगलाय
[८]भक्तमानदाय [९]भक्तवरदाय च ते नमः ॥ २ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तसुखदाय [२]भक्तरामाय [३]भक्ताऽऽरामाय
[४]भक्तविश्रामाय [५]भक्तविश्वासाय [६]भक्तसुखंकराय
[७]भक्तसुखसाधकाय [८]भक्तसुखैकपराय [९]भक्तसुखसुखिने
च ते नमः ॥ ३ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तसुखधामाय [२]भक्तार्चिताय [३]भूतप्रेतपिशाच
बाधाहराय [४]भगवद्भक्तिनिधये [५]भगवन्निष्ठाय [६]भक्ति-
मार्गप्रदीपाय [७]रामदूताय [८]आत्मनिभक्तप्रीति
वर्धनाय [९]भक्तियोगिने च ते नमः ॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तभाग्य योगसाधकाय [२]भक्तियोगीशाय [३]भक्तहितवर्धनाय [४]भक्तवंशवर्धनाय [५]भक्तकार्याणि-संवर्धकाय [६]भक्तभाग्यविधात्रे [७]भक्तप्रभवे [८]भक्तसंकट विरामाय [९]भक्तकमलसूर्याय च ते नमः॥ ५ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तिमत्सुविशिष्टाय [२]भक्त दैन्य विनाशकराय [३]भक्तभाग्यविश्वकर्मणे [४]भक्तिवेदविदे [५]भक्तिवेद्याय [६]भववैद्याय [७]भक्तशांतिदाय [८]भक्तशोकविनाशकाय [९]भक्तभारसाहिने च ते नमः॥ ६ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तेश्वराय [२]भक्तप्रियाय [३]भक्तसुखकराय [४]भक्तकाम्याय [५]द्रोणाचलधराय [६]भक्तोद्धारकाय [७]भक्त-भाग्यसुनियामकाय [८]भक्तितत्त्वविदुषे [९]भक्तजनात्मने च ते नमः ॥ ७ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तोत्तमाय देवाय [२]भगवतिरामचंद्रे अनन्य-
भावेश्वराय [३]भक्तधर्मगोप्त्रे [४]भक्तिप्रमाणाय [५]भीमगर्व-
हराय [६]भक्तप्राणाय [७]भक्तमनोहराय [८]भक्तमहादेवाय
[०]भक्तमहानिधये च ते नमः ॥ ८ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तधर्माऽऽदर्शाय [२]भक्तलोकनायकाय [३]भक्त-
प्रियकराय [४]भक्तप्रेरकाय [५]भक्तबंधवे [६]भक्तस्वामिने
[७]भक्तायवसुप्रदाय [८]भक्तस्तुतिकीर्तये [०]भक्तविश्वासभूमये
च ते नमः ॥ ९ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तयात्मने [२]भक्तचिंतादूरीकरणाग्रयाय [३]भक्त-
शर्माय [४]भक्तेभ्यः श्रीदाय [५]भक्तिश्रीनिवासाय [६]भक्ती-
श्रीशाय [७]भक्तश्रेयाय [८]भक्तकमलसवित्रे [०]भक्तवशाय
च ते नमः ॥१०॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो भक्तसुप्रसादाय भक्तसुहृत्तमाय भक्तसखाय भक्तरक्षणक्षमाय भक्तायक्षमाकराय भक्तिगम्याय भव्य-सिंदूरलेपनाय भक्तभगवंताय भक्तनिषेविताय भक्त-विशारदाय च ते नमः ॥११॥

इति श्रीमद्धनुमद्रुद्रसूक्तस्य रामदूतनामकः षष्ठोऽनुवाकः ।

## अथ सप्तमोऽनुवाकः

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः श्रीमद्रामभक्तमुख्याय भक्तमनोविचारविदे भक्तपूजिताय भक्तलोकहितकर्त्रे भक्ततारकाय भक्त-जीवनाय भक्तनमस्कृताय भीमरूपाय भक्तिश्रीमते भक्तरक्षणकर्मयोगिने च ते नमः ॥ १ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।

ॐ नमो [१]भक्तसंतापनाशनाय [२]भक्ताऽऽनंदवर्धनाय [३]भव संतापनाशनाय [४]भक्तदुःखदावानलाय [५]भक्तपरमानंदाय [६]भक्तजनसुखानंदाय [७]भक्तप्राणेशाय [८]महारुद्राय [९]भक्तितत्त्वज्ञाय च ते नमः ॥ २ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।

ॐ नमो [१]भक्तायसुखदायकाय [२]भक्तहर्षवर्धनाय [३]भक्तक्षेमकराय [४]भक्तसुशास्त्रे [५]श्रीमद्रामभक्त लोकेशाय [६]भूतप्रेतसंमधनिग्रहसमर्थाय [७]श्रीमद्रामभक्त जगज्जीवनाय [८]मूर्तपराक्रमाय [९]मेरुद्धीजाय च ते नमः ॥ ३ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।

ॐ नमो [१]मरुत्कुलपावनाय [२]मातृसौख्यप्रदाय [३]मत्सरविहीनाय [४]महारूपधराय [५]महाशक्तिमते [६]मधुकृपाय [७]मनोजवाय [८]महाकर्माय [९]महाक्रतवे च ते नमः ॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।

ॐ नमो [१]महाक्रमाय [२]महातपसे [३]महातेजसे [४]महाद्युतिमते

[५]महाद्रिधारणक्षमाय [६]महते [७]महाबलाय [८]महाबुद्धिमते [९]महाभागाय च ते नमः ।। ५ ।।

ॐ नमो भगवते श्रीमते हनुमते मारूतये तुभ्यं ।

ॐ नमो [१]महामनसे [२]महामूर्तये [३]महार्हाय [४]महाशक्तये [५]महावर्याय [६]महास्वनाय [७]महेज्याय [८]महोत्साहाय [९]महामान्याय च ते नमः।। ६ ।।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।

ॐ नमो [१]महामेधाविने [२]महावाग्मिने [३]महाविक्रमाय [४]मारुतये [५]मरुत्पुत्राय [६]मनःसंपातविक्रमाय [७]महाभुजाय [८]मुदासहस्यसत्कृताय [९]मेरूराज्यपतिकेसरिनंदनाय च ते नमः।। ७ ।।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।

ॐ नमो [१]मित्राणामभयंकराय [२]महारूपाय [३]महाकायाय [४]महायशसे [५]महात्मने [६]महापवित्राय [७]महानादाय [८]महावेगाय [९]मनोवेगाय च ते नमः ।। ८ ।।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]महोरस्काय [२]महायशस्विने [३]महाऽऽशयाय [४]महा-
प्रज्ञावते [५]महाप्राज्ञे [६]मनःशुद्धिकराय [७]मानसाऽल्हादवर्ध-
नाय [८]महापुरुषाय [९]महाग्रहहराय च ते नमः ॥ ९ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]युक्तिमते [२]युक्तस्वाभिमानिने [३]यद्भविष्यद्द्रष्टे
[४]यशोज्योतिष्मते [५]युद्धतत्वविदे [६]यत्नदेवाय [७]यत्नफलप्रदाय
[८]यत्नमार्गदर्शकाय [९]युद्धलालसाय च ते नमः ॥ १० ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]यमदंडाऽवध्याय [२]युधिष्ठिराय [३]बाहुबलयुद्ध-
शास्त्रजाय [४]ब्रह्मास्त्रावध्यताप्राप्तब्रह्मचर्यदीक्षिणे [५]प्राप्तवर-
सदुपयोगकराय [६]वरसंपद्विनियोगसुमार्गदर्शकाय
[७]अमोघबलसामर्थ्येऽपिह्यनवलिप्तमनोविकाराय [८]संपद्वि-
नियोगोदाहरणभूताय [९]प्राप्तदेवत्वेऽपिश्रीमद्रामभक्तत्वाऽ

भिमानिने [१०]अमरप्रभावाय च ते नमः ॥११॥

इति श्रीमद्धनुमद्रुद्रसूक्तस्य श्रीमद्रामभक्तजगज्जीवन-नामकः सप्तमोऽनुवाकः ।

## अथाष्टमोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]निर्जराय [२]मृत्युंजयाय [३]सुराय [४]विबुधाय [५]देवाय [६]सुपर्वणे [७]सुमनसे [८]त्रिदिवेशाय [९]दिवौकसे [१०]लब्धाऽऽदितेयत्वाय च ते नमः ॥ १ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]दिविषदे [२]लेखाय [३]अदितिनंदनसामर्थ्यवते [४]आदित्यतुल्याय [५]ऋभुर्वे [६]अस्वप्नाय [७]अमर्त्याय [८]अमृतांधसे [९]बर्हिर्मुखाय च ते नमः ॥ २ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]ऋतुभुजाय [२]गीर्वाणाय [३]दानवारिणे [४]राक्षसारिणे
[५]वृंदारकाय [६]दैवताय [७]पुण्यशीलाय [८]पुण्यात्मने [९]श्रीमद्राम
प्रभुप्रेरिताऽखंडितस्वभक्तरक्षणकर्मयोगिने च ते नमः॥३॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]सर्वशक्तिमते [२]अमितौजसे [३]सर्वशक्नुवते [४]सर्व-
समर्थाय [५]सामर्थ्याऽतिशयिने [६]ऊर्जस्विने [७]विभवसंपन्नाय
[८]अतितेजसे [९]अपरिमितविक्रमाय च ते नमः॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]दारागृहानासक्ताय [२]प्रभुत्वसंपन्नाय
[३]देवप्रभावाय [४]देवाऽधिकारवते [५]श्रीमद्रामभक्त
जगदधिपतये [६]ईशसत्तावते [७]ऐश्वर्यवते [८]प्रभवे
[१०]प्राप्तजगत्प्रभुत्ववते च ते नमः ॥ ५ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]ऊर्जस्वलाय [२]अतिप्रबलाय [३]ऊर्जितसत्त्वाढ्याय
[४]अतिबलाढ्याय [५]प्रभविष्णवे [६]ऊरुविक्रमाय [७]अलंतमाय

[९]स्वप्रतीतिकारणेऽपि साधुवृत्ताय [१०]श्रीमद्रघुनंदन भक्ताय
च ते नमः ॥ ६ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]श्रीमद्रामविश्वाससंपादकाय [२]श्रीमद्रामकार्य-
निमग्नाय [३]श्रीमद्रामदासस्वरूपिणे [४]श्रीमद्रामदासाऽऽ-
श्रयाय [५]रौद्रस्वभावाय [६]रौद्रभयानकमुद्रावते [७]रभसो-
त्पात कौतुकिने [८]राक्षसमारकाय [९]राक्षसनाशकाय च ते
नमः ॥ ७ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]राक्षसपिष्ठकराय [२]राक्षसभयंकराय [३]रावणाधि-
क्षेपसाधकाय [४]श्रीमद्रामकार्यैकवीराय [५]श्रीमद्रामकार्य-
तत्पराय [६]श्रीमद्रामकार्यनिष्ठाय [७]श्रीमद्रामभक्तशिरोमणिने
[८]श्रीमद्रामकार्यसाधकशिरोमणिने [९]राक्षससंत्रासकराय
च ते नमः॥ ८ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]राक्षसवधूमनस्तापदाय [२]राक्षसीवैधव्यकराय

[३]राक्षसीभीतिदाय [४]राक्षसीनिद्रानाशकराय [५]राक्षसी-
–दुःस्वप्नकारकाय [६]राक्षसीनिद्रालोपकराय [७]रावणरिपवे
[८]राक्षसान्तकस्वरूपाय [९]राक्षसानर्थकराय च ते नमः ॥९॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]राक्षसमनोदाहकराय श्री[२]मद्रामभक्तश्रेष्ठाय
[३]सुमौ श्रीमद्रामप्रभुप्रतिनिधये [४]श्रीमद्रामकृपाधनवते श्री[५]मे-
द्रामभाक्तिमहद्धनमानिने [६]रणप्रियाय [७]रिपुसुवह्निस्व-
भावाय [८]श्रीमद्रामभक्तविश्वधारकाय [९]राक्षसवीरहन्त्रे च
ते नमः ॥ १० ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]श्रीमद्रामकार्यैन्यग्रमानसे [२]श्रीमद्रामकार्यैकव्यव
सायिने [३]श्रीमद्रामभक्तशरण्याय [४]रिपुशून्यीकराय [५]श्री
मद्रामप्रभुसत्कृताय [६]श्रीमद्रामप्रभुभक्तिपरायणाय [७]श्री
मद्रामवरार्हत्वविजयिने [८]श्रीमद्रामप्रभुपरिष्वंगप्राप्ति-
साधकाय [९]श्रीमद्रामप्रभुप्रियार्थं कृतोत्साहाय [१]श्रीमद्राम-

प्रभुवाहकाय च ते नमः॥ ११ ॥

इति श्रीमद्धनुमद्रुद्रसूक्तस्य श्रीमद्रामकृपाधनवान्नाम अष्टमोऽनुवाकः ।

## अथ नवमोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो श्रीमद्रामप्रभोरतुलसाहाय्यकराय रौद्ररूपाय श्रीमद्रामप्रभुभक्तिस्वरूपिणे श्रीमद्रामप्रभुप्रियाय श्रीमद्रामप्रभुभक्तिनिष्ठाय श्रीमद्रामप्रभुमान्याय श्रीमल्लक्ष्मणसांत्वनकराय लंकारक्षिकाविजेत्रे लघुरूपधराय लंकागतवृक्षफलभक्षकाय च ते नमः॥ १॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो लंकादहनकर्मकारणाय लघुमूर्तये लंकाशत्रवे

[४]लंकापालानिर्जेत्रे [५]लंकापालापरिभवदात्रे [६]लंकापालां-
वशीकर्त्रे [७]लंकासुवर्णसंस्कारकरणहेतुभूताय [८]लंकावासि-
जनानां शोकप्रदात्रे [९]लंकावासिजनकंपदस्मरणाय च
ते नमः ॥ २ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]लंकावासिजनानांभयदायकाय [२]श्रीमल्लक्ष्मण
प्राणार्पण कारणभूताय [३]वरदानसमर्थाय [४]वातसूनवे
[५]वाताऽऽनंदकराय [६]वायुपुत्राय [७]विपाशाय [८]वज्राभिघात-
संमोहपाशोद्धारसाधिने [९]वज्रप्रहारप्राप्तक्षेमाय
च ते नमः ॥ ३ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]वाग्मिने [२]वाक्कुशलाय [३]वानराग्रण्ये [४]वृक्षकंपन-
क्षमाय [५]वृक्षकंपनपातितफलभक्षकाय [६]वानरप्रभवे [७]वान-
रगणेश्वराय [८]वायुनंदनाय [९]वानरश्रेष्ठाय च ते नमः ॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]भक्तेभ्योवसुप्रदाय [२]वाचस्पतये [३]वाताऽऽत्मजाय

[४]विजितात्मने [५]विद्वत्तमायभक्ताय [६]विधेयात्मने
[७]विनयाय [८]विमुक्तात्मने [९]विरजाय च ते नमः ॥ ५ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]विविक्ताय [२]विशुद्धात्मने [३]विशोकाय [४]विश्रु-
तात्मने [५]विश्वदक्षिणाय [६]वपुविस्तारक्षमाय [७]वीतभयाय
[८]वानरैकवीराय [९]वृद्धात्मने च ते नमः ॥ ६ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]वीरवृषभाय [२]वृषकर्मणे [३]वानरवृषभाय
[४]वेगवते [५]व्यक्तरूपाय [६]व्यवस्थानाय [७]वानरशरभाय
[८]वीरश्रीमतांवराय [९]वीर्यसत्ताप्रदाय च ते नमः ॥ ७ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]विचक्षणाय [२]वज्राङ्गाय [३]विमलाऽऽशयाय
[४]विदुषे [५]वीराऽधिवारांगाय [६]वातजाय [७]वज्राऽवध्याय
[८]वानरपुंगवाय [९]वातजनिने च ते नमः ॥ ८ ॥
ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]वरूणपाशाऽवध्याय [२]विश्वकर्माऽऽयुधाऽवध्याय

[३]विश्वविख्याताय [४]विशालाक्षाय [५]विशालबाहवे [६]वज्र-
प्रहारसममुष्टिबलप्रहाराय [७]विजितेन्द्रियाय [८]विपक्षजेत्रे
[९]विवेकविदे च ते नमः ॥ ९ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [१]वानरवंदिताय [२]विजयाय [३]वानरकुलपूजिताय
[४]वानरोत्तमाय [५]विश्वेऽस्मिन् प्राप्तकालप्रविष्टाय [६]शोभनाय
[७]शांतस्वभावाय [८]शांतमुद्राय [९]शक्तिमते च ते नमः ॥१०॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]शक्तिमतामग्रण्ये [२]शक्तिमतांश्रेष्ठाय [३]शत्रुघ्नाय
[४]शत्रुजिते [५]शत्रुतापनाय [६]शांताय [७]शाश्वताय [८]शास्त्रप्रज्ञाप्रदाय
[९]शिवाय [१०]शिष्टकृते च ते नमः ॥ ११ ॥

इति श्रीमद्धनुमद्रुद्रसूक्तस्य श्रीमद्रामप्रभुभक्तिस्वरूपिन्नाम
नवमोऽनुवाकः ।

# अथ दशमोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [1]शिष्टेष्टाय [2]शुचये [3]शुद्धबुद्धियोगप्रदाय [4]शुभांगाय [5]शुभेक्षणाय [6]शूराय [7]शूरजनेश्वराय [8]श्रीकराय [9]श्रीनिधये [10]शौर्यश्रीनिवासाय च ते नमः ॥ १ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [1]शस्त्राऽवध्याय [2]शरणागतपालकाय [3]श्रीदगदा-वध्याय [4]श्रीशंकरप्रभुशस्त्राऽस्त्राऽवध्याय [5]शत्रुभयदाय [6]वैष्णवाय [7]श्रीकृष्णप्रभुमान्यवराय [8]शत्रुविनाशाय [9]शोभनरूपाय च ते नमः ॥ २ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमो [1]श्रीमद्रामभक्तिवर्धनाय [2]शुद्धात्मने [3]षाड्गुण्य-भगवते [4]बाल्येऽपि फलग्रहणहेतोः सूर्यबिंबग्रहणप्रयत्नाय [5]सर्वविश्वोपकारिणे [6]सर्वदेवप्रमुखसंस्तुताय [7]स्वैरसंचा-रिणे [8]सुर्यात्माप्तविद्यावते [9]स्वाभिमानिने च ते नमः ॥३॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]सदाऽनंदिने [२]सुग्रीवमंत्रिणे [३]सुग्रीवसखाय [४]संयमिने [५]स्वप्रतिष्ठापराङ्मुखाय [६]स्ववचनरक्षित्रे [७]साधन-शुचिताऽऽग्रहविहीनाय [८]स्वरूपान्तरक्षपाय [९]संयोजकाय च ते नमः ॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]संयोजनाकुशलाय [२]सेतुबंधनसाहाय्यकराणा-मग्रेसराय [३]सेतुबंधनकार्यप्राणाय [४]सीताशोधसाधकाय [५]सीताधीरदाय [६]सीताऽज्ञापाकाय [७]सीतापतिसमाऽऽश्वासकाय [८]सीतामनस्तापहन्त्रे [९]सुग्रीवायाहितोपदेशकर्त्रे च ते नमः ॥ ५ ॥

ॐ नमो भगवते श्रीमत हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]सेतुदिग्रक्षणकराय [२]लंकायामेवसीताबंधन-मोक्षसाधकाय [३]सुष्ट्वेष्टप्रतिपालकाय [४]सततोत्थितपादाय [५]सुभक्तदर्पसमर्थनकर्त्रे [६]सुष्ट्वेष्टरक्षणकर्त्रे [७]सागरोड्डाणकर्त्रे [८]सुष्ट्वेष्टनिग्रहहर्त्रे [९]सत्यप्रत्ययाय च ते नमः॥ ६ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं।
ॐ नमः [१]सूक्ष्मवपुषे [२]सुग्रीवेष्टजनभयहर्त्रे [३]सूक्ष्ममूर्तये [४]सूक्ष्मशरीरधारणक्षमाय [५]सुग्रीवेष्टशोकहर्त्रे [६]सीताशोक-विनाशनाय [७]सत्कर्त्रे [८]सत्कीर्तिमते [९]सीतासत्कृताय च ते नमः ॥ ७ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं
ॐ नमः [१]सर्वलोकसत्कृताय [२]सत्कातिमते [३]सतांगतये [४]सत्पथाचारवते [५]सत्परायणाय [६]सत्याय [७]सत्यधर्मपरायणाय [८]सत्यधर्मपराक्रमाय [९]सत्यधर्मात्मने च ते नमः ॥ ८ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं।
ॐ नमः [१]सत्यमेधसे [२]सत्त्ववते [३]सत्त्वस्थाय [४]सूर्यवर्चस्वीने [५]सदाऽमार्षिणे [६]सदैवश्रीमद्रामभक्तियोगिने [७]सन्ताय [८]सन्नि-वासाय [९]समाय च ते नमः ॥९॥

ॐ नमो भगवते श्रीमत हनुमते मारुतये तुभ्यं।
ॐ नमः [१]समयज्ञाय [२]समात्मने [३]समीरणसूताय [४]समीहनाय

[५]सवित्रे [६]सविताऽभिलाषिणे [७]सूर्यमोक्षकाय [८]सर्वदृशे [९]सर्वतं-
श्चक्षुष्मते च ते नमः ॥१०॥

ॐ नमो भगवते श्रीमते हनुमते मारुतय तुभ्यं ।
ॐ नमः [१]सर्वदर्शिने [२]सर्वपापविमोक्षाय [३]सुग्रीवसचिवाय
[४]सत्तमाय [५]समीरात्मजाय [६]सुरसाप्रतिसंधात्रे [७]सिंहिकाहृदय
दारणाय [८]सीताऽन्वेषणसाधकाय [९]समीरात्मभूत्रे [१०]सीता-
मनःसमाश्वासनकर्त्रे च ते नमः ॥ ११ ॥

इति श्रीमद्धनुमद्रुद्रसूक्तस्य सदैवश्रीमद्रामभक्तियोगी
नामकः दशमोऽनुवाकः ।

## अथ एकादशोऽनुवाकः ।

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]स्वमहत्त्वसाधकाय [२]साहसप्रियाय [३]संधान-
विशल्यकरिणिनां वनस्पतिनां संपादकाय [४]सरामलक्ष्मण

सेनाजीवितप्रदाय [5]सीतायै रावणवधसुवार्तानिवेदन-
कराय [6]सीताविप्रियभाषिणी राक्षसीहन्तुकामाय
[7]सीतावचनमानदानपरायणाय [8]राक्षसीवधात्प्रतिनिवृत्ताय
[9]सूर्यशतिककलावते [10]तेजस्विने च ते नमः॥ १ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [1]सूर्यात्प्राप्तसर्वशास्त्रज्ञानाय [2]संग्रामेऽविषादिने
[3]संयुगे रोमहर्षणजनन कर्मकराय [4]सर्व सुलक्षणलक्षण्याय
[5]सर्व विज्जयिने [6]सर्वविद्धानवे [7]सर्वबल भृद्रराय [8]सर्वसंहाय
[9]सर्वज्ञाय च ते नमः ॥२॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [1]सहिष्णवे [2]स्तुत्याय [3]स्थविराय [4]स्वनामस्मृर्त-
तारकाय [5]स्ववशाय [6]स्वस्तिकृते [7]सात्विकाय [8]साधवे
[9]सिद्धाय च ते नमः ॥ ३ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [1]संकल्पाय [2]सिद्धार्थाय [3]सिद्धिदाय [4]सिद्धि-

साधनाय [५]सुतपसे रामादर्शाय [७]वीरसुंदराय [८]रामदर्शकाय [९]सुमनोरथ साधकाय च ते नमः ॥ ४ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]सुमुखाय [२]सुमेधसे [३]सुराऽऽनंदाय [४]सुरारिहन्त्रे [५]सुरूचिमते [६]सुलोचनाय [७]सुवीराय [८]सुव्रताय सुष्ट्वेष्टरक्षण कराय च ते नमः ॥ ५ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]संकर्षणाय [२]संधात्रे [३]सत्संमिताय [४]स्वयंश्रेष्ठाय [५]सदाविजयिने [६]सर्वबंधविमोचनाय [७]सुधीराय [८]सर्वकामदाय [९]सुबलाय च ते नमः ॥ ६ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]सुदर्शनाय [२]सुमहास्वनाय [३]सुष्टवेष्टसत्कत्रे [४]सत्य-वताय [५]सुलक्षणाय [६]संसारतापशमनाय [७]सत्यविज्ञान-भास्कराय [८]सत्फलाऽऽश्रयाय स्वांनंदसुख वर्धनाय च ते नमः ॥ ७ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]सत्यवादिने [२]सत्यसंधाय [३]साधुवरिष्ठाय [४]सावधानाय [५]संसारश्रमनाशकाय [६]साधकेश्वराय [७]संसारतापनाशनाय [८]सकलाऽऽश्रयाय [९]सद्भूतेय च ते नमः ॥ ८ ॥

ॐ नमो भगवते श्रीमते हनुमते मातरुये तुभ्यं ।
ॐ नमः [१]सद्गतये [२]सावधातकर्त्रे [३]सत्यपरायणाय [४]सत्यमार्गप्रबोधकराय [५]साधुजनार्चिताय [६]सवमान्यार्य [७]सत्यप्रियाय [८]सुशीलाय [९]सुदाक्षिणाय च ते नमः ॥ ९ ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतंये तुभ्यं ।
ॐ नमः [१]स्वस्थाय [२]स्वच्छंदाय [३]सुभगाय [४]सुष्ठवहंकाराय [५]सुष्ठुसंस्कारवते [६]गगनयिहारिणे [७]सर्वसिद्धीप्रदाय [८]न्वर्थ प्राप्ते लक्षणाय [९]क्षमिणांवराय च ते नमः ॥ १० ॥

ॐ नमो भगवते श्रीमते हनुमते मारुतये तुभ्यं ।
ॐ नमः [१]क्षेमकराय [२]ज्ञानसागराय [३]ज्ञानात्मने [४]ज्ञानविधये

[५]भक्तकामकल्पद्रुमाय [६]जगदांतराय [७]भक्ताय सुखं कराय [८]भक्तहितकराय [९]भक्तवंशसातत्य रक्षिणे [१०]भक्तसुखेस्वसुख शोधकाय च ते नमः ॥ ११ ॥

इति श्रीमद्ध नुमद्रुद्रसूक्तस्य रामदर्शकनाम एकादशोऽनुवाकः

इति श्रीमध्दहनुमद्रुद्रसूक्तं संपूर्णम् । श्री हनुमते अर्पणमस्तु । शांतिः पुष्टिस्तुष्टिरस्तु । कल्याणमस्तु । शिवोम् ।

---

## " एतद् सत्कार्योत्तेजकाः "

सर्वश्री – डॉ. ना. श्री. वाटवे कल्याण,
का. ए. काशीकर कल्याण,
श्री. भ. चव्हाण मुंबई ६०,
पां. ल. टाकसाळे मुंबई ७०,
देवेन्द्र पिल्ले कल्याण,
अ. रा. नाबर मुंबई ६०,
रा. सि. गोगटे मुंबई ६२,
ना. स. अमृतवार मुंबई १३,
अ. ज. ओगले,
बी. व्ही. देशपांडे कल्याण,
श्या. बा. कुलकर्णी कल्याण,
पु. स. शिरसाट मुंबई ४.
श्री. बा. निबंधे मुंबई ६२,
अ. भा. लिमये नांदेड,
पाटील मुंबई,
पी. जी. जोशी मुंबई,
कृ. रा. लोकरे
पु. ए. काशीकर पुणे,
कां. ज. शहा,
रा. ला. सोळंकी मुंबई ६२.

# शुद्धिपत्रम् ।

| पृष्ठक्रमः | पंक्तिः | अशुद्धं | शुद्धं |
|---|---|---|---|
| ३ | १४ | आग्राह्याय | [६]अग्राह्याय |
| ८ | ५ | स्वाथिवानवते | स्वाभिमानवते |
| | १० | क्षमा | क्षम |
| ९ | ४ | [१]ऐश्वर्यवन्ताय | [१]ऐश्वर्यवते |
| | ६ | [७]कर्तुत्वता | [७]कर्तुत्ववतां |
| १० | १३ | [४]गुर्वभीभानिने | [४]गुर्वाभिमानिने |
| ११ | २ | [४]गुरुत्मांस्तु | गरूत्मत्तु |
| १३ | १२ | [५]दीनपते | [५]दीनपतये |
| १४ | ७ | [८]निग्रहिते | [८]निग्रहीते |
| | १३ | इत्यमलं[११] | इत्यमलं |
| | १४ | तदांऽऽजननेय | तदांऽऽजनेय |
| १६ | ८,१३ | नमो | नमः |
| | ९ | विशारदां | विशारदानां |
| १८ | ३ | [६]पृथ्वीपतितत्रपदे | [६]पृथ्वीपतित्व प्रदाय |
| १९ | ७ | [१]निर्जिवता | [१]निर्जिता |
| | १५ | [६]प्रणतां | [६]प्रणमतां |

| पृष्ठक्रमः | पंक्तिः | अशुद्धं | शुद्धं |
|---|---|---|---|
| २० | ११ | भूवना | भुवना |
| २५ | २ | सखाय | सखिने |
| | ४ | [६]भक्तभगवंताय | [६]भक्तभगवते |
| ३१ | १२,१३ | शिरोमणिने | शिरोमणये |
| ३२ | ६ | [३]भुमौ | [३]भूमौ |
| ३८ → १४, १५, १६ ; ३९ → २,३ ; ४२ → ५, १२ | | सुष्टुवे | सुष्टुवि |
| ३९ | ११ | [४]सूर्यवर्चस्वीने | [४]सूर्यवर्चस्विने |
| ४० | १ | [६]सविताऽभिलाषिणे | [६]सवितारमाभिलाषिणे |
| | ६ | [०]समीरात्मभूवे | [०]समीरात्मभुवे |
| | १३ | करिणिनां | करिणीनां |
| ४१ | ११ | [४]स्वनामस्मृर्तृ | स्वनामस्मर्तृ |
| ४३ | ६ | [२]सावधातकर्त्रे | सावधानकर्त्रे |
| | ७ | [६]सवमान्यार्य | [६]सर्वमान्याय |
| ४४ | १ | [६]जगदांतराय | [६]जगदंतराय |

श्रीमद् हनुमत् स्तोत्राच्या वाचनानें
आपणां सर्वांना व्यायाम करावासा वाटेल

**मग**

- सूर्य नमस्कार — १ रु.
- योगासनें — ६ रु.
- माझा रोजचा व्यायाम कोणता ?
  - भाग १ ला — २॥ रु.
  - भाग २ रा — २॥ रु.
- निसर्गोपचार — ४ रु.
- जीवनसत्व तक्ता — ४ रु.

ही आमची पुस्तकें घ्या व वाचा.
मोठे सूचीपत्रक मागवा.

चित्रशाळा प्रेस-प्रकाशन, पुणे ३०

National Library, Calcutta.

## नारो अप्पाजी गोडबोले

( स्थापना इ. स. १८५८ )

**आमचेकडे सर्व प्रकारची शालोपयोगी,**

**धार्मिक, ज्योतिषविषयक**

**आणि इतर विविध**

**विषयांवरील**

**पुस्तकें मिळतील.**

६३४ बुधवार पेठ, बालाजी समोर, पुणे २.

# संदिप लायब्ररी

३०५ शुक्रवार पेठ, पुणे २.

( चिंचेच्या तालमीजवळ )

१ ) आमचेकडे सर्व प्रकारच्या कथा, कादंबऱ्या, रहस्यकथा अल्प वर्गणीत वाचावयास मिळतात.

२ ) आम्ही सर्व प्रकारची नवीन मराठी मासिके योग्य कमिशनने विकतो व बाहेरगांवी पाठवितो.

( ३ ) मागील महिन्यांची मराठी मासिके पावपट किंमतीत बाहेरगांवी पाठवितो.

( ४ ) जुन्या रहस्यकथा विकतो.

आजच पत्रव्यवहार करावा.

## संदिप लायब्ररी

३०५ शुक्रवार पेठ, पुणे २.

( चिंचेच्या तालमीजवळ )

( १ ) आमचेकडे सर्व प्रकारच्या कथा, कादंबऱ्या, रहस्यकथा अल्प वर्गणीत वाचावयास मिळतात.

( २ ) आम्ही सर्व प्रकारची नवीन मराठी मासिके योग्य कमिशनने विकतो व बाहेरगांवी पाठवितो.

( ३ ) मागील महिन्यांची मराठी मासिके पावपट किंमतीत बाहेरगांवी पाठवितो.

( ४ ) जुन्या रहस्यकथा विकतो.

आजच पत्रव्यवहार करावा.